श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री नृसिंहपुराणे श्री मार्कण्डेय विरचिता

# ॥ श्री नृसिंहस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री नृसिंहस्तुतिः ॥

मार्कण्डेय उवाच

नरं नृसिंहं नरनाथमच्युतं
प्रलम्बबाहुं कमलायतेक्षणम्।
क्षितीश्वरैरर्चितपादपङ्कजं
नमामि विष्णुं पुरुषं पुरातनम्॥ 1 ॥

जगत्पतिं क्षीरसमुद्रमन्दिरं
तं शार्ङ्गपाणिं मुनिवृन्दवन्दितम्।
श्रियः पतिं श्रीधरमीशमीश्वरं
नमामि गोविन्दमनन्तवर्चसम्॥ 2 ॥

अजं वरेण्यं जनदुःखनाशनं
गुरुं पुराणं पुरुषोत्तमं प्रभुम्।
सहस्रसूर्यद्युतिमन्तमच्युतं
नमामि भक्त्या हरिमाद्यमाधवम्॥ 3 ॥

पुरस्कृतं पुण्यवतां परां गतिं
क्षितीश्वरं लोकपतिं प्रजापतिम्।
परम्पराणामपि कारणं हरिं
नमामि लोकत्रयकर्मसाक्षिणम्॥ 4 ॥

भोगे त्वनन्तस्य पयोदधौ सुरः
पुरा हि शेते भगवाननादिकृत्।

क्षीरोदवीचीकणिकाम्बुनोक्षितं
तं श्रीनिवासं प्रणतोऽस्मि केशवम् ॥ 5 ॥

यो नारसिंहं वपुरास्थितो महान्
सुरो मुरारिर्मधुकैटभान्तकृत्।
समस्तलोकार्तिहरं हिरण्यकं
नमामि विष्णुं सततं नमामि तम् ॥ 6 ॥

अनन्तमव्यक्तमतीन्द्रियं विभुं
स्वे स्वे हि रूपे स्वयमेव संस्थितम्।
योगश्वरैरेव सदा नमस्कृतं
नमामि भक्त्या सततं जनार्दनम् ॥ 7 ॥

आनन्दमेकं विरजं विदात्मकं
वृन्दालयं योगिभिरेव पूजितम्।
अणोरणीयांसमवृद्धिमक्षयं
नमामि भक्तप्रियमीश्वरं हरिम् ॥ 8 ॥

॥ श्री नृसिंहस्तुतिः समाप्ता ॥